श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

एन् एस् शठकोपाचार्य कृतं

# ॥ श्रीशौरिराज भुजङ्गम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font. Our thanks to Sri. Sundar Varadarajan of California for proofreading this document.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीशौरिराज भुजङ्गम् ॥

प्रसन्नाम्बुजाक्षं लसत्केशपाशं
स्फुटत्तुङ्गनासं स्फुरन्मन्दहासम्।
प्रयोगात्तचक्रं सशङ्खाभिरामं
परं पद्मनाभं भजे शौरिराजम्॥ १ ॥

स्फुरच्चारुपुण्ड्रं लसद्यज्ञसूत्रं
चलत्पीतचेलं तटित्तुल्यवेगम्।
क्वणन्नूपुराढ्य भ्रमन्पादपद्मं
सुभूषोज्ज्वलाङ्गं भजे शौरिराजम्॥ २ ॥

घुमच्चारुगन्धं ज्वलद्दीपराशिं
नदद्वेदघोषं डमड्ढाद्यनादम्।
लसच्चारुवेषं मिलत्साधुसङ्घं
नमद्भक्तवर्गं भजे शौरिराजम्॥ ३ ॥

पतिं पद्मजायाः क्षमाकान्तमीड्यं
गतिं सज्जनानां गरुत्मत्सुपूज्यम्।
नमद्भक्तपालं नरोत्तं समाद्यं
भवाम्भोधिपोतं भजे शौरिराजम्॥ ४ ॥

शुभे नित्यवापीतटे कृष्णपुर्यां
सुधासिन्धुकन्यायुतं पद्मिनीशम्।
चिदानन्दमूर्तिं चिरण्डीमनोज्ञं
सतां बन्धुमीशं भजे शौरिराजम्॥ ५ ॥

मुदा माघमासे महाब्धेस्सुतीर्थं
विहारं भजन्तं सुदाशश्च पूज्यम्।

www.prapatti.com

मनोहारिवेषान् दधन्तं लसन्तं
सदानन्दपूर्णं भजे शौरिराजम्॥ ६ ॥

परव्यूहभेदैः द्विपञ्चावतारैः
तथान्यैः स्वरूपैः समर्चां भजन्तम्।
वसन्ते हृदाब्जे सतां योगिवर्यैः
सदा ध्यायमानं भजे शौरिराजम्॥ ७ ॥

खगेशं भुजङ्गं तुरङ्गं प्लवङ्गं
मृगेन्द्रं सुमञ्चं विमानं रथं च।
अलङ्कारभेदैः समारुह्य प्रीत्या
स्वपुर्यां चरन्तं भजे शौरिराजम्॥ ८ ॥

तरण्डे प्रदीप्ते प्रियाभिः समेत्य
तटाके सुरम्ये प्लुतिं संभजन्तम्।
सुडोलाधिरूढं स्वलङ्कारवेषैः
मनोहारिणं तं भजे शौरिराजम्॥ ९ ॥

पुरे सौधरम्ये वने कृष्णनाम्नि
दयापूर्णमूर्तिं सदा सुन्दराङ्गम्।
प्रियाश्लिष्टगात्रं पृथापुत्रमित्रं
परब्रह्मरूपं भजे शौरिराजम्॥ १० ॥

भुजङ्गप्रयातेन वृत्तेन भक्त्या
शठारातिनाम्ना कृतं स्तोत्रमेतत्।
रथाङ्ग प्रयोगे प्रसिद्धं प्रणम्य
विभुं शौरिराजं सुखं सन्तनोतु॥ ११ ॥

॥ इति श्रीशौरिराज भुजङ्गं समाप्तम्॥

www.prapatti.com